भेदार्थो भादौ पाठ इति केचित्। इति दुर्गादासः॥

कैकयी, स्त्री, (जनपदात् क्षत्त्रियात् अञ्। यद्वा, केकय + स्वार्थे अण्। कैकय + बाहुलकात् न यादे रियादेशः। तस्यापत्यं स्त्री ङीप्।) कैकयी। इति शब्दरत्नावली॥

कैकेयी, स्त्री, (केकेयः केकयराजः तस्यापत्यं स्त्री ङीप्।) केकयी। सा तु केकयराजकन्या दशरथराजपत्नी च। इति शब्दरत्नावली॥
(यथा, रघौ १२। २।
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा"॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्यकर्म्म वा। किङ्कर + ष्यञ्।) किङ्करत्वम्। दासत्वम्॥ (यथा, भागवते। ३। २। २२।
"तत् तस्य कैङ्कर्य्यमलं भृतान् नो
विग्लापयत्यङ्ग! यदुग्रसेनम्"॥)

कैटजः, पुं, (कुटज एव स्वार्थे अण् वृद्धिः। पृषोदरात् औकारस्य ऐकारत्वम्।) कुटजवृक्षः। इति भावप्रकाशः॥

कैटभः, पुं, स्वनामख्यातो दैत्यविशेषः॥ (अयन्तु विष्णोः कर्णमलोद्भूतयोरसुरयोरन्यतरः। पाद्मकल्पे जातः सन् एकार्णवे योगनिद्रायां स्थितस्य भगवतो नाभिपद्मादाविर्भूतं अजयोनिं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्दान्तोऽसुरः॥) यथा,— मार्कण्डेयपुराणम्।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ"॥
(एतस्योत्पत्त्यादिकं सविस्तरं हरिवंशे ५२ अध्याये दर्शनीयम्॥)

कैटभजित्, पुं, (कैटभं स्वनामख्यातमसुरं जितवान्। जि + भूते क्विप्। तुगागमश्च।) विष्णुः। इत्यमरः॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभहा, [न्] पुं, (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा। हन् + क्विप् भूते।) विष्णुः। इति हेमचन्द्रः॥ (स च सर्व्वशक्तिर्भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनार्थं गुणाधिष्ठातृत्वमभ्युपैति, तत्र तु यदा जीवादृष्टवशात् यद्यद्गुणात्मिकात्मिका क्रियाशक्तिरुपतिष्ठते नितरां गुणाधिष्ठातृकतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति। परं देहाभिमानवतां जीवानामिव तस्य प्रकृतेर्वृद्धिकृतगुणे मनो न ह्यासज्जते हृषीकेशत्वात् गुणनियन्तृत्वादित्यर्थः देहाभिमानराहित्याच्च। अत एव स कैटभजिन्मधुजिदित्याद्युपाधिकतयोच्यते वस्तुतस्तु जीवैर्यत् किञ्चित् क्रियते तत् सर्व्वमेव गुणपरतन्त्रैरेवशत एव। ईश्वरस्य तु भृत्या इव गुणा स्वाधीनाः सन्तः तदाज्ञयैव क्रिया उत्पादयन्ति सम्पादयन्ति च॥)

कैटभा, स्त्री, (कूटा गुणास्तत्कार्य्यं सृष्ट्यादिकं कैटं। कूट + अण् वृद्धिः पृषोदरात् औकारस्य ऐकारत्वं। तेन तैर्वा भाति प्रकाशते या। भा + क्विप्।) दुर्गा। इति त्रिकाण्डशेषः॥

कैटभारिः, पुं, (कैटभस्य स्वनामख्यातस्यासुरभेदस्य अरिः शत्रुः। पक्षे कैटभस्य तमसः अरिर्दमयिता। सगुणावस्थायामपि ईश्वरस्य विष्णोः सत्त्वगुणप्राधान्यात् तथात्वम्।) विष्णुः। इति हलायुधः॥

कैटभी, स्त्री, (कैटभं तदाख्यया प्रसिद्धं असुरं प्रति इः हननक्रियारूपतेजःप्रकाशोऽस्याः।) यद्वा, कूटं तमःप्रधानभावमधिष्ठाय तामसी प्रकृतिरिति विश्रुता देवकार्य्यसाधनानुरोधात् तदात्त्वया भातीति। कूट + अणि वृद्धौ कौटं पृषोदरात् औकारस्य ऐकारत्वं कैटं भा + कः। ततो ङीप् कैटभी तामसीत्यर्थः॥) दुर्गा। इति त्रिकाण्डशेषः। (मधुकैटभभीतब्रह्मणस्तुतया प्रसादिततया तामस्या विमोहितौ तौ दुर्दान्तावसुरौ विष्णुना निहतौ। यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः"॥
इत्युपक्रम्य।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्"॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपुर्य्या ईश्वरी कर्त्री। पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री।) दुर्गा। यथा।
"कैटभन्तु वशं कृत्वा स्थिता तत्पुरी यथा।
तेन सा गीयते देवी पुराणे कैटभेश्वरी"॥
इति देवीपुराणे ४५ अध्यायः॥

कैटर्य्यः, पुं, (किट् त्रासे + भावे घञ्। केटं त्रासं राति ददाति तिक्तादीनामातिशय्यात्। रा दाने + कः। ततः स्वार्थे ष्यञ्।) कट्फलः। इत्यमरः। २। ४। ४०॥ निम्बः। महानिम्बः। इति रत्नमाला॥ मदनवृक्षः। इति राजनिर्घण्टः॥

कैडर्य्यः, पुं, (कैटर्य्य + पृषोदरात् डत्वे साधुः।) कट्फलः। पूतिकरञ्जः। कटभीवृक्षः। इति राजनिर्घण्टः॥

कैतकं, क्ली, (केतक्या इदं "तस्येदम्"। ४। ३। १२०। इत्यण्) केतकीपुष्पम्। यथा। कैतकं तिक्तकटुकमिति राजवल्लभः॥

कैतवं, क्ली, (कितव + स्वार्थे अण्।) कपटः। (कितवस्य भावः कर्म्म वा। युवादित्वादण्।) द्यूतः। इत्यमरः। २। १०। ४५॥ वैदूर्य्यमणिः। इति राजनिर्घण्टः॥ (कितवस्य भावः। कपटता। यथा, भागवते १। १। २। "धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्"॥)

कैदारं, क्ली, (केदाराणां क्षेत्राणां समूहः। इति अण्।) क्षेत्रसमूहः। इत्यमरटीकायां भरतः॥ (केदारे क्षेत्रे प्रयत्नेनानीतं यज्जलं तत्कैदारम्। तद्गुणादिकमुक्तं भावप्रकाशे यथा—
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम्।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत्"॥)

कैदारः, पुं, (केदारे क्षेत्रे भवः इत्यण्।) शालिधान्यम्। इति राजनिर्घण्टः॥ (केदारसम्बन्धिनो ये ते कैदाराः इत्यर्थः। यथा, भावप्रकाशे।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः।
कषाया अल्पवर्च्चस्का मेध्याश्चैव बलावहाः"॥)

कैदारकं, क्ली, (केदाराणां समूहः केदारस्य इदं वा। केदार + वुञ्।) केदारसमूहः। क्षेत्रगणः। इत्यमरः। २। ९। ११॥

कैदारिकं, क्ली, (केदाराणां समूहः केदारे भवं तस्येदं वा। केदार + ठञ्।) कैदारकम्। इत्यमरः। २। ९। ११॥

कैदार्य्यं, क्ली, (केदाराणां समूहः। केदार + ष्यञ्।) क्षेत्रम्। क्षेत्रसमूहः। इत्यमरः। २। ९। ११॥

कैमुतिकः, पुं, (किमुत इत्यव्ययं तस्मात् आगतः। ठक्।) न्यायविशेषः। तथा च छन्दोगपरिशिष्टम्।
"वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
पियासवस्तुगच्छन्ति संहृष्टा ह्यशरीरिणः॥
समवायश्च यत्रैषां तत्रान्ये बहवो मलाः।
नूनं सर्व्वे क्षयं यान्ति किमुतैकं नदीरजः"॥
इति प्रायश्चित्ततत्त्वम्॥

कैरवं, क्ली, (के जले रौति कलनादं करोतीति। रु + अच् केरवः हंसः तत्प्रियत्वे कृतीयलुक्। तस्य प्रियमित्यण्।) कुमुदम्। श्वेतोत्पलम्। इत्यमरः। १। १०। ३७। (यथा, महाभारते १। १। ८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्"॥)

कैरवः, पुं, (कुत्सितो रवो यस्य स एव स्वार्थे अण्। पृषोदरात् औकारस्य ऐकारत्वम्।) शत्रुः। कितवः। इति मेदिनी॥

कैरविणी, स्त्री, (कैरव पुष्करादित्वात् इनिः। ततो ङीप्।) कुमुदिनी। इति शब्दरत्नावली॥ (कैरवाणि सन्त्यस्यां इति इनि ङीप् च। कुमुदयुक्ता पुष्करिणी॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् च।) चन्द्रिका। इति मेदिनी॥ मेथिका। इति राजनिर्घण्टः॥

कैरवी, [न्] पुं, (कैरवं प्रियत्वेन प्रकाशत्वेन वा अस्त्यस्य इति इनिः।) चन्द्रः। इति शब्दमाला॥

कैराटकः, पुं, (किरं पर्य्यन्तभूमिं चरमावस्थां मृत्युदशामित्यर्थः अटति प्राप्नोति यस्मात्। किर + अट् + अच्। ततः स्वार्थे कन् अण् च।) स्थावरविषभेदः। इति हेमचन्द्रः॥